# Gosavitri Stotram

# ગોસાવિત્રીસ્તોત્રમ્

## Document Information

Text title : gosAvitrIstotram

File name : gosAvitrIstotram.itx

Category : devii, otherforms, devI

Location : doc_devii

Description/comments : Extended version of conersation between Shrikrishna and Yudhishthira, Ashvamedhikaparva adhyAya 106, verses 46-59

Latest update : August 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 21, 2020

*sanskritdocuments.org*

# ગોસાવિત્રીસ્તોત્રમ્

નારાયણં નમસ્કૃત્ય દેવીં ત્રિભુવનેશ્વરીમ્ ।
ગોસાવિત્રીં પ્રવક્ષ્યામિ વ્યાસેનોક્તં સનાતનીમ્ ॥ ૧॥

યસ્ય શ્રવણમાત્રેણ સર્વપાપૈઃ પ્રમુચ્યતે ।
ગવાં નિઃશ્વસિતં વેદાઃ સષડઙ્ગપદક્રમાઃ ॥ ૨॥

શીક્ષા વ્યાકરણં છન્દો નિરુક્તં જ્યોતિષં તથા ।
એતાસામગ્રશૃઙ્ગેષુ ઇન્દ્રવિષ્ણૂ સ્વયંસ્થિતૌ ॥ ૩॥

શિરો બ્રહ્મા ગુરુઃ સ્કન્ધે લલાટે વૃષભધ્વજઃ ।
કર્ણયોરશ્વિનૌ દેવૌ ચક્ષુષોઃ શશિભાસ્કરૌ ॥ ૪॥

દંષ્ટ્રેષુ મરુતો દેવા જિહ્વાયાં ચ સરસ્વતી ।
કણ્ઠે ચ વરુણો દેવો હૃદયે હવ્યવાહનઃ ॥ ૫॥

ઉદરે પૃથિવી દેવી સશૈલવનકાનના ।
કકુદિ દ્યૌઃ સનક્ષત્રા પૃષ્ઠે વૈવસ્વતો યમઃ ॥ ૬॥

ઊર્વોસ્તુ વસવો દેવા વાયુર્જઙ્ગે સમાશ્રિતઃ ।
આદિત્યસ્ત્વાશ્રિતો વાલે સાધ્યાઃ સર્વાઙ્ગસન્ધિષુ ॥ ૭॥

અપાને સર્વતીર્થાનિ ગોમૂત્રે જાહ્નવી સ્વયમ્ ।
ધૃતિઃ પુષ્ટિર્મહાલક્ષ્મીર્ગોમયે સંસ્થિતાઃ સદા ॥ ૮॥

નાસિકાયાં ચ શ્રીદેવી જ્યેષ્ઠા વસતિ ભામિની ।
ચત્વારઃ સાગરાઃ પૂર્ણા ગવાં હ્યેવ પયોધરે ॥ ૯॥

ખુરમધ્યેષુ ગન્ધર્વાઃ ખુરાગ્રે પન્નગાઃ શ્રિતાઃ ।
ખુરાણાં પશ્ચિમે ભાગે હ્યપ્સરાણાં ગણાઃ સ્મૃતાઃ ॥ ૧૦॥

શ્રોણીતસ્તેષુ પિતરો રોમલાઙ્ગૂલમાશ્રિતાઃ ।
ઋષયો રોમકૂપેષુ ચર્મણ્યેવ પ્રજાપતિઃ ॥ ૧૧॥

હુઙ્કારે ચતુરો વેદા હુંશબ્દે ચ પ્રજાપતિઃ ।
એવં વિષ્ણુમયં ગાત્રં તાસાં ગોપ્તા સ કેશવઃ ॥ ૧૨॥

ગવાં દૃષ્ટ્વા નમસ્કૃત્ય કૃત્વા ચૈવ પ્રદક્ષિણમ્ ।
પ્રદક્ષિણીકૃતા તેન સપ્તદ્વીપા વસુન્ધરા ॥ ૧૩॥

કામદોગ્ધ્રી સ્વયં કામદોગ્ધા સન્નિહિતા મતા ।
ગોગ્રાસસ્ય વિશેષોઽસ્તિ હસ્તસમ્પૂર્ણમાત્રતઃ ॥ ૧૪॥

શતબ્રાહ્મણભુક્તેન સમમાહુર્યુધિષ્ઠિર ।
ય ઇદં પઠતે નિત્યં શ‍ૃણુયાદ્વા સમાહિતઃ ॥ ૧૫॥

બ્રાહ્મણો લભતે વિદ્યાં ક્ષત્રિયો રાજ્યમશ્નુતે ।
વૈશ્યો ધનસમૃદ્ધઃ સ્યાચ્છૂદ્રઃ પાપાત્ પ્રમુચ્યતે ॥ ૧૬॥

ગર્ભીણી જનયેત્ પુત્રં કન્યા ભર્તારમાપ્નુયાત્ ।
સાયં પ્રાતસ્તુ પઠતાં શાન્તિસ્વસ્ત્યયનં મહત્ ॥ ૧૭॥

અહોરાત્રકૃતૈઃ પાપૈસ્તત્ક્ષણાત્ પરિમુચ્યતે ।
ફલં તુ ગોસહસ્રસ્યેત્યુક્તં હિ બ્રહ્મણા પુરા ॥ ૧૮॥

ગાવો મે હ્યગ્રતઃ સન્તુ ગાવો મે સન્તુ પૃષ્ઠતઃ ।
ગાવો મે હૃદયે સન્તુ ગવાં મધ્યે વસામ્યહમ્ ॥ ૧૯॥

સુરભિર્વૈષ્ણવી માતા નિત્યં વિષ્ણુપદે સ્થિતા ।
ગોગ્રાસં તુ મયા દત્તં સુરભિઃ પ્રતિગૃહ્યતામ્ ॥ ૨૦॥

ગાવો મે માતરઃ સર્વાઃ સર્વે મે પિતરો વૃષાઃ ।
ગ્રાસમુષ્ટિં મયા દત્તં સુરભિઃ પ્રતિગૃહ્યતામ્ ॥ ૨૧॥

ફલાનાં ગોસહસ્રસ્ય પ્રદદ્યાદ્બ્રાહ્મણોત્તમે ।
સર્વતીર્થાધિકં પુણ્યમિત્યુક્તં બ્રહ્મણા પુરા ॥ ૨૨॥

॥ ઇતિ ગોસાવિત્રીસ્તોત્રમ્ ॥

The stotra is extended version of portion in
Ashvamedhikaparva adhyAya 106, verses 46-59
and is conversation between Shrikrishna and Yudhishthira.
(Kumbhakonam edition)

ભગવાનુવાચ। ૧૪-૧૦૬-૪૪
ઇત્યુક્ત્વાઽસ્યૈ વરં દત્ત્વા પ્રયયુસ્તે યથાગતમ્ ।
લોકનિસ્તરણાર્થાય સા ચ લોકાંશ્ચચાર હ ॥ ૧૪-૧૦૬-૪૪
તસ્યામેવ સમુદ્ભૂતા હ્યેતાશ્ચ કપિલા નવ ।
વિચરન્તિ મહીમેનાં લોકાનુગ્રહકારણાત્ ।
તસ્માત્તુ કપિલા દેયા પરત્ર હિતમિચ્છતા ॥ ૧૪-૧૦૬-૪૫
યદા ચ દીયતે રાજન્કપિલા હ્યગ્નિહોત્રિણે ।
તદા ચ શૃઙ્ગયોસ્તસ્યા વિષ્ણુરિન્દ્રશ્ચ તિષ્ઠતિ ॥ ૧૪-૧૦૬-૪૬
ચન્દ્રવજ્રધરૌ ચાપિ તિષ્ઠતઃ શૃઙ્ગમૂલયોઃ ।
શૃઙ્ગમધ્યે તથા બ્રહ્મા લલાટે ગોવૃષધ્વજઃ ॥ ૧૪-૧૦૬-૪૭
કર્ણયોરશ્વિનૌ દેવૌ ચક્ષુષી શશિભાસ્કરૌ ।
દન્તેષુ મરુતો દેવા જિહ્વાયાં વાક્સરલસ્વતી ॥ ૧૪-૧૦૬-૪૮
રોમકૂપેષુ મુનયશ્ચર્મણ્યેવ પ્રજાપતિઃ ।
નિશ્વાસેષુ સ્થિતા વેદાઃ સષડઙ્ગપદક્રમાઃ ॥ ૧૪-૧૦૬-૪૯
નાસાપુટે સ્થિતા ગન્ધાઃ પુષ્પાણિ સુરભીણિ ચ ।
અધરે વસવઃ સર્વે મુખે ચાગ્નિઃ પ્રતિષ્ઠિતઃ ॥ ૧૪-૧૦૬-૫૦
સાધ્યા દેવાઃ સ્થિતાઃ કક્ષે ગ્રીવાયાં પાર્વતી સ્થિતા ।
પૃષ્ઠે ચ નક્ષત્રગણાઃ કકુદ્દેશે નભસ્સ્થલમ્ ॥ ૧૪-૧૦૬-૫૧
અપાને સર્વતીર્થાનિ ગોમૂત્રે જાહ્નવી સ્વયમ્ ।
ઇષ્ટતુષ્ટમયા લક્ષ્મીર્ગોમયે વસતી તદા ॥ ૧૪-૧૦૬-૫૨
નાસિકાયાં સદા દેવી જ્યેષ્ઠા વસતિ ભામિની ।
શ્રોણીતટસ્થાઃ પિતરો રમા લાઙ્ગૂલમાશ્રિતા ॥ ૧૪-૧૦૬-૫૩
પાર્શ્વયોરુભયોઃ સર્વે વિશ્વેદેવાઃ પ્રતિષ્ઠિતાઃ ।
તિષ્ઠત્યુરસિ તાસાં તુ પ્રીતઃ શક્તિધરો ગુહઃ ॥ ૧૪-૧૦૬-૫૪
જાનજઙ્ઘોરુદેશેષુ પઞ્ચ તિષ્ઠન્તિ વાયવઃ ।
ખુરમધ્યેષુ ગન્ધર્વાઃ ખુરાગ્રેષુ ચ પન્નગાઃ ॥ ૧૪-૧૦૬-૫૫
ચત્વારઃ સાગરાઃ પૂર્ણાસ્તસ્યા એવ પયોધરાઃ ।
રતિર્મેધા ક્ષમા સ્વાહા શ્રદ્ધા શાન્તિર્ધૃતિઃ સ્મૃતિઃ। ૧૪-૧૦૬-૫૬
કીર્તિર્દીપ્તિઃ ક્રિયા કાન્તિસ્તુષ્ટિઃ પુષ્ટિસ્ચ સન્તતિઃ ।
દિશશ્ચ પ્રદિશશ્ચૈવ સેવન્તે કપિલાં સદા ॥ ૧૪-૧૦૬-૫૭
દેવા પિતૃગણાશ્ચાપિ ગન્ધર્વાપ્સરસાં ગણાઃ ।
લોકા દ્વીપાર્ણવાશ્ચૈવ ગઙ્ગાદ્યાઃ સરિતસ્તથા ॥ ૧૪-૧૦૬-૫૮

દેવાઃ પિતૃગણાશ્ચાપિ વેદાઃ સાઙ્ગાઃ સહાધ્વરૈઃ ।
વેદોક્તૈર્વિવિધૈર્મન્ત્રૈઃ સ્તુવન્તિ હૃષિતાસ્તથા ॥ ૧૪-૧૦૬-૫૯
વિદ્યાધરાશ્ચ યે સિદ્ધા ભૂતાસ્તારાગણાસ્તથા ।
પુષ્પવૃષ્ટિં ચ વર્ષન્તિ પ્રનૃત્યન્તિ ચ હર્ષિતાઃ ॥ ૧૪-૧૦૬-૬૦
બ્રહ્મણોત્પાદિતા દેવી વહ્નિકુણ્ડાન્મહાપ્રભા ।
નમસ્તે કપિલે પુણ્યે સર્વદેવૈર્નમસ્કૃતે ॥ ૧૪-૧૦૬-૬૧
કપિલેઽથ મહાસત્વે સર્વતીર્થમયે શુભે ।
દાતારં સ્વજનોપેતં બ્રહ્મલોકં નય સ્વયમ્ ॥ ૧૪-૧૦૬-૬૨
અહો રત્નમિદં પુણ્યં સર્વદુઃખઘ્નમુત્તમમ્ ।
અહો ધર્માર્જિતં શુદ્ધમિદમગ્ર્યં મહાધનમ્ ।
ઇત્યાકાશસ્થિતસ્તે તુ સર્વદેવા જપન્તિ ચ ॥ ૧૪-૧૦૬-૬૩
તસ્યાઃ પ્રતિગ્રહીતા ચ ભુઙ્ક્તે યાવદ્વિજોત્તમઃ ।
તાવદ્દેવગણાઃ સર્વે કપિલામર્ચયન્તિ ચ ।
સ્વર્ણશૃઙ્ગીં રૂપ્યખુરાં ગન્ધૈઃ પુષ્પૈઃ સુપૂજિતામ્ ॥ ૧૪-૧૦૬-૬૪
વસ્ત્રાભ્યામહતાભ્યાં તુ યાવત્તિષ્ઠત્યલઙ્કૃતા ।
તાવદ્યદિચ્છેત્કપિલા મન્ત્રપૂતા સુસંસ્કૃતા ।
ભૂલોકવાસિનઃ સર્વાન્બ્રહ્મલોકં નયેત્સ્વયમ્ ॥ ૧૪-૧૦૬-૬૫
ભૂરશ્વઃ કનકં ગાવો રૂપ્યમશ્વં તિલા યવાઃ ।
દીયમાનાનિ વિપ્રાય પ્રહૃષ્યન્તિ દિનેદિને ॥ ૧૪-૧૦૬-૬૬
અથ ત્વશ્રોત્રિયેભ્યો વૈ તાનિ દત્તાનિ પાણ્ડવ ।
તથા નિન્દન્ત્યથાત્માનમશુભં કિંનુ નઃ કૃતં ॥ ૧૪-૧૦૬-૬૭
અહો રક્ષઃપિશાચૈશ્ચ લુપ્યમાનાઃ સમન્તતઃ ।
યાસ્યામો નિરયં શીઘ્રમિતિ શોચન્તિ તાનિ વૈ ॥ ૧૪-૧૦૬-૬૮
એતાન્યપિ દ્વિજેભ્યો વૈ શ્રોત્રિયેભ્યો વિશેષતઃ ।
દીયમાનાનિ વર્ધન્તે દાતારં તારયન્તિ ચ ॥ ૧૪-૧૦૬-૬૯

*Gosavitri Stotram*

pdf was typeset on August 21, 2020

Please send corrections to *sanskrit@cheerful.com*